१३

उत्तररामचरितम् - अष्टावक्रसंवादः

प्रस्तावना

अस्मिन् पाठे प्रस्तावनायाः परं नाटकम् आरभ्यते। अत्र प्रथमतः सीतां सान्त्वयितुं रामः प्रविशति। तस्मिन् एव काले महर्षिः अष्टावक्रः ऋष्यशृङ्गस्य आश्रमात् तत्र आगच्छति। स चागत्य सीतां रामं च प्रति गुरुजनैः वसिष्ठादिभिः प्रदत्तान् उपदेशान् श्रावयति। राम आदेशानुसारमेव जीवनं यापयिष्यति इति प्रतिज्ञां करोति। ततश्च लक्ष्मणः आगत्य चित्रकरेण अङ्कितं चित्रं द्रष्टुं रामं कथयति। प्रसङ्गतः सीतायाः पवित्रतां वर्णयति रामः इत्येतत् सर्वं वयं पाठस्य पठनेन एव ज्ञास्यामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामस्य कांश्चन गुणान् ज्ञातुं शक्नुयात्।
- देव्याः सीतायाः चरितं जानीयात्।
- छन्दसां लक्षणानि जानीयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।।

१३.१) सम्पूर्णः मूलपाठः

(ततः प्रविशत्युपविष्टो रामः सीता च)

रामः- **देवि ! वैदेहि ! विश्वसिहि ते हि गुरवो न शक्नुवन्ति विहातुमस्मान्।**
किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥८॥

सीता - **जाणामि अज्जउत्त! जाणामि। किंदु संदावआरिणो बन्धुजणविप्प-ओआ होन्ति।**
(जानामि आर्यपुत्र! जानामि किन्तु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति)।

रामः - **एवमेतत्। एते हि दयमर्मच्छिदः संसारभावा। येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः।**

(प्रविश्य)

कञ्चुकी - रामभद्र ! (इत्यर्धोक्ते साशङ्कम्) महाराज ! -

रामः - (सस्मितम्) आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य। तद्यथाभ्यस्तमभिधीयताम्।

कञ्चुकी - देव ! ऋश्यश्रृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।

सीता - अज्ज ! तदो किं विलम्बीअदि (आर्य! ततः किं विलम्ब्यते)।

रामः - त्वरितं प्रवेशय।

(कञ्चुकी निष्क्रान्तः।)

(प्रविश्य)

अष्टावक्रः - स्वस्ति वाम्।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भअव णमो दे। अवि कुसलं सजामातुअस्स गुरुअणस्स अज्जाए सन्ताए अ। (भगवन्नमस्ते। अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च?)

रामः - निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यश्रृङ्गः, आर्या च शान्ताः ?

सीता - अम्हे वि सुमरेदि (अस्मानपि स्मरति?)

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुर्भगवान् वसिष्ठस्त्वामिदमाह-

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च॥९॥

तत्किमन्यदाशास्महे। केवलं वीरप्रसवा भूयाः।

रामः - अनुगृहीताः स्मः।

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥१०॥

अष्टावक्रः - इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टम् - 'यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात्सम्पादयितव्य' इति।

रामः- क्रियते यद्येषा कथयति।

अष्टावक्रः - ननान्दुः पत्या च देव्याः संदिष्टम्- 'वत्से, कठोरगर्भेति नानीतासि। वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः इति।

रामः - (सहर्षलज्जास्मितम्) तथास्तु। भगवता वसिष्ठेन न किञ्चिदादिष्टोस्मि।

अष्टावक्रः - श्रूयताम्।

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवं च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद्यशो यत्परमं धनं वः॥११॥

रामः - यथा समादिशति भगवान्मैत्रावरुणिः।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता- अदो जेव्व राहवधुरन्धरो अज्जउत्तो। (अत एव राघवधुरन्धर आर्यपुत्रः।)

रामः - कः कोऽत्र भोः। विश्राम्यतामष्टावक्रः।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

(प्रविश्य)

लक्ष्मणः- जयति जयत्यार्यः। आर्य! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखतम्। तत्पश्यत्वार्यः।

रामः- जानासि वत्स! दुर्मनायमानां देवीं विनोदयितुम्। तत्कियन्तमवधिं यावत्।

लक्ष्मणः- यावदार्याया हुताशनशुद्धिः।

रामः- शान्तं पापम् (ससान्त्ववचनम्।)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १३ ॥

देवि देवयजनसम्भवे ! प्रसीद। एष ते जीविताविधिः प्रवादः।

क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥ १४॥

१३.२) साम्प्रतं मूलपाठम् अवगच्छाम - १०

(ततः प्रविशत्युपविष्टो रामः सीता च)

रामः- **देवि ! वैदेहि ! विश्वसिहि ते हि गुरवो न शक्नुवन्ति विहातुमस्मान्।**
किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥८॥

सीता - **जाणामि अज्जउत्त! जाणामि। किंदु संदावआरिणो बन्धुजणविप्प-ओआ होन्ति। (जानामि आर्यपुत्र! जानामि किन्तु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति)।**

रामः - **एवमेतत्। एते हि दयमर्मच्छिदः संसारभावा। येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः।**

अन्वयः -

(ततः प्रविशति उपविष्टः रामः सीता च)

रामः - दैवि वैदेहि, समाश्वसिहि, हि ते गुरवः अस्मान् विहातुं न शक्नुवन्ति। किन्तु अनुष्ठाननित्यत्वं स्वातन्त्र्यम् अपकर्षति। हि आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा।

सीता - आर्यपुत्र, जानामि, बन्धुजनविप्रयोगाः सन्तापकारिणः भवन्ति।

रामः - एवम् एतत्। संसारभावाः हृदयमर्मच्छिदः येभ्यः बीभत्समानाः मनीषिणः सर्वान् कामान् सन्त्यज्य अरण्ये विश्राम्यन्ति।

अन्वयार्थः

(ततः तस्मात् प्रविशति मञ्चे आविर्भवति उपविष्टः आसीनः रामः तत्पत्नी सीता च)

रामः - हे देवि वैदेहि विदेहराजपुत्रि! समाश्वसिहि विश्वसिहि समाश्वस्ता भव। हि यतः ते तव गुरवः जनकमहोदयाः अस्मान् त्वां मां च विहातुं परित्यक्तुं न शक्नुवन्ति समर्थाः न भवन्ति।

किन्तु परन्तु अनुष्ठाननित्यत्वं नित्यनैमित्तिकादिकर्मकलापनिर्वतनस्य नियमितत्वं स्वातन्त्र्यं स्वच्छन्दताम् अपकर्षति न सहते। हि यतः आहिताग्नीनाम् आहिताः स्थापिताः अग्नयः यैः ते तेषाम् अग्निहोत्रिणां गृहस्थता गार्हस्थ्यं प्रत्यवायैः विहितानाचरणजन्यैः पातकैः सङ्कटा दुःखपूरिता।

सीता - आर्यपुत्र स्वामिन्, जानामि वेद्मि, किन्तु परन्तु बन्धुजनविप्रयोगाः पितृजनादिविरहाः सन्तापकारिणः खेदजनकाः भवन्ति सन्ति।

रामः - एवम् एतत् त्वया यदुक्तं तत् सत्यमेव। संसारभावाः जीवलोकधर्माः हृदयमर्मच्छिदः हृदयस्य मर्माणि सन्धिस्थानानि छिन्दति ये ते हृदयमर्मस्थलभेदकाः येभ्यः संसारभावेभ्यः बीभत्समानाः जुगुप्समानाः विरक्ताः मनीषिणः आत्मदर्शिनः सर्वान् समस्तान् कामान् विषयान् सन्त्यज्य परित्यज्य अरण्ये वने विश्राम्यन्ति शान्तिं प्राप्नुवन्ति।

व्याख्यानम् -

अत्र श्रीरामः पितृगमनात् तद्वियोगात् खिन्नां पत्नीं सीतां प्रति समाश्वासं करोति। जनकमहोदयाः अस्माकं पूज्याः गुरुजनाः च वर्तन्ते। अतः ते अधिकं कालं व्याप्य अस्मान् विहाय स्थातुं न शक्ताः। अतः स पुनरागमष्यति इति भावः। एवं प्रकारेण जानकीं सान्त्वयति प्रभुः श्रीरामः।

नित्यं नैमित्तिकं काम्यं चेति त्रिविधं कर्म भवति। तेषु नित्यकर्मानुष्ठाने फलं नास्ति, किन्तु अनाचारे प्रत्यवायो सम्भवति। नैमित्तिककर्मानुष्ठाने फलं विद्यते अपि च अकरणे सति प्रत्यवायो भवति। काम्यकर्मानुष्ठाने फलं किमपि नास्ति अविधाने दोषः अपि नास्ति। धार्मिकः पुरुषः एतानि कर्माणि नियतम् आचरन्ति। अर्थात् ते वैवाहिकजीवने नित्यम् अग्निहोत्रम् उपासते। तदेव तेषां नित्यकर्म। एवं विदेहराजः जनकः अग्निहोत्रम् आचरति स्म। अतः अयोध्यायां स बहुदिनं यावत् स्थातुम् अशक्तः आसीत्। तस्मात् एव स गतवान्, न तु सीतां प्रति स्नेहस्य न्यूनतावशात् इति सीतां प्रति रामस्य सान्त्वनवचनम्।

रामस्य आश्वासप्रदानात् परं सीता रामम् उद्दिश्य अकथयत् यत् सा सर्वमेव अवगच्छति इति। किन्तु स्वजनानां वियोगः सततं सन्तापदायी भवति। एतत्सीतावचः श्रुत्वा सत्यतया स्वीकृत्य च रामः अवदत् – अस्य संसारस्य धर्माः हृदयस्य मर्मभेदकाः सन्ति। येभ्यः विरक्ताः आत्मज्ञाः सर्वान् विषयान् परित्यज्य वनेषु शान्तिं लभन्ते। तत्र कामना एव दुःखस्य मूलम्।

व्याकरणविमर्शः -

१. विहातुम् - विपूर्वकात् हाधातोः तुमुन्प्रत्यये विहतुम् इति रूपम्।

२. अनुष्ठानम्- अनुपूर्वकात् स्थाधातोः ल्युटि तस्य अनादेशे अनुष्ठानम् इति रूपम्। अनुष्ठानस्य नित्यत्वम् अनुष्ठाननित्यत्वम् इति षष्ठीतत्पुरुषसमासः।

३. प्रत्यवायः- प्रति अव इत्युपसर्गद्वयपूर्वकात् इण्धातोः घञ्प्रत्यये प्रत्यवाय इति रूपम्।

४. आहिताग्नीनाम् - आहितः अग्निः यैः ते आहिताग्नयः, तेषाम् आहिताग्नीनाम् इति बहुव्रीहिसमासः। साग्निकानाम् इत्यर्थः।

५. बीभत्समानाः - बध्धातोः सनप्रत्यये निष्पन्नाद् बीभत्सधातोः शानचि पुंसि प्रथमाबहुवचने बीभत्समानाः इति रूपम्।

६. बन्धुजनविप्रयोगाः - विपूर्वकात् प्रपूर्वकात् युज्धातोः घञा विप्रयोगशब्दो निष्पन्नः। बन्धुजनानां विप्रयोगाः बन्धुजनविप्रयोगाः इति षष्ठीतत्पुरुषसमासः।

सन्धिविच्छेदः -

१. किन्त्वनुष्ठाननित्यत्वम् - किन्तु+अनुष्ठाननित्यत्वम्।

२. ह्याहिताग्नीनाम् - हि+आहिताग्नीनाम्।

३. प्रत्यवायैर्गृहस्थता - प्रत्यवायैः+गृहस्थता।

छन्दः - अस्मिन् श्लोके अनुष्टुप्-छन्दः वर्तते।

अलङ्कारविमर्शः -

१. अत्र श्लोके पूर्वार्धं प्रति उत्तरार्धस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः।

२. उत्तरार्धेन पूर्वार्धस्य समर्थनाद् अर्थान्तरन्यासालङ्कारः। तल्लक्षणं दर्पणे -

"सामान्यं वा विशेषेण विशेषस्तेन वा यदि।

कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते।।

साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।।" इति।

३. अत्र अर्थान्तरन्यासस्य काव्यलिङ्गस्य चाङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - १

१. किं गृहस्थानां स्वातन्त्र्यम् अपकर्षति।

२. किन्त्वनुष्ठाननित्यत्वम् सन्धिविच्छेदं कुरुत।

३. कर्म कतिविधं कतिविधं भवति। कानि च तानि।

४. आहिताग्नीनां गृहस्थता कथं भवति।

५. के सन्तापकारिणः भवन्ति।

६. संसारभावाः कथं भवन्ति।

७. कथं मनीषिणः अरण्ये विश्राम्यन्ति।

१३.३) साम्प्रतं मूलपाठम् अवगच्छाम - ११

(प्रविश्य)

कञ्चुकी - **रामभद्र! (इत्यर्धोक्ते साशङ्कम्) महाराज ! -**

रामः - **(सस्मितम्) आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य। तद्यथाभ्यस्तमभिधीयताम्।**

कञ्चुकी - **देव ! ऋश्यश्रृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।**

सीता - **अज्ज ! तदो किं विलम्बीअदि (आर्य! ततः किं विलम्ब्यते)।**

रामः - **त्वरितं प्रवेशय।**

(कञ्चुकी निष्क्रान्तः।)

अन्वयः -

(प्रविश्य) कञ्चुकी - रामभद्र! (इत्यर्धोक्ते साशङ्कम्) महाराज!

रामः - (सस्मितम्) आर्य! ननु रामभद्र! इत्येव तातपरिजनस्य मां प्रति उपचारः शोभते। तद् यथा अभ्यस्तम् अभिधीयताम्।

कञ्चुकी - देव! ऋश्यश्रृङ्गाश्रमाद् अष्टावक्रः सम्प्राप्तः।

सीता - आर्य! ततः किं विलम्ब्यते।

रामः - त्वरितं प्रवेशय।

(कञ्चुकी निष्क्रान्तः।)

अन्वयार्थः -

(प्रविश्य प्रवेशं कृत्वा)

कञ्चुकी - रामभद्र शोभनराम (इत्यर्धोक्ते साशङ्कं सभयम्) महाराज प्रभो...।

रामः - (सस्मितम् ईषद्धास्येन सहितम्) आर्य तातपरिजनस्य पितृचरणसेवकस्य रामभद्र इत्येव मां रामचन्द्रं प्रति उपचारः व्यवहारः शोभते युज्यते। तत् तस्माद् हेतोः यथाभ्यस्तम् अभ्यासानुरूपम् अभिधीयताम् उच्यताम्।

कञ्चुकी - देव प्रभो ऋष्यशृङ्गाश्रमात् मुनेः ऋष्यशृङ्गस्य आश्रमात् अष्टावक्रः तन्नामकः महात्मा सम्प्राप्तः आगतः।

सीता - आर्य ततः तस्मात् किं किमर्थं विलम्ब्यते विलम्बः क्रियते।

रामः - त्वरितम् अतिशीघ्रं प्रवेशय प्रवेशं कारय।

(कञ्चुकी निष्क्रान्तः गतः)

व्याख्यानम् -

ततः कञ्चुकी प्रविश्य रामचन्द्रं पूर्वतनाभ्यासानुसारं रामभद्र इत्येव आहूतवान्। किन्तु इदानीं सः अयोध्यायाः अधिपतिः सञ्जातः। अतः सशङ्कितः स परस्मिन् एव मूहूर्ते रामं महाराज इति आहूतवान्। एतत् सर्वम् अवलोक्य श्रीरामः स्मितहासं कृत्वा कञ्चुकीम् उद्दिश्य अवोचत् यत् रामभद्र इत्येव व्यवहारः तस्मै रोचते। यतो हि एते परिचारकाः पितृचरणसेवकाः भवन्ति। अत्र रामस्य औदार्यं प्रशंसनीयमेव। महाराजः सन्नपि भृत्यान् भयरहितान् सम्पादयति, एतेन तस्य क्षमा कथम् आसीत् इति बुध्यते। एवं तस्य धीरोदात्तनायकत्वम् उपपन्नम्। तस्मात् हेतोः पूर्वाभ्यासानुसारं वक्तव्यम् इति। कञ्चुकी ज्ञापितवान् यत् ऋष्यशृङ्गमुनेः आश्रमात् महर्षिः अष्टावक्रः आगतः। तदा रामः सीता च महर्षिं शीघ्रमेव अन्तः आनयनाय आज्ञापयतः। ततः च कञ्चुकी निर्गच्छति।

विशेषटिप्पणी -

कञ्चुकः परिच्छेदः अस्यास्तीति कञ्चुकी। कञ्चुकिलक्षणं नाट्यशास्त्रे तावत् -

"अन्तःपुरचरो वृद्धो विप्रो रूपगुणान्वितः।

सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।।" इति। स्मितलक्षणं दर्पणे तु -

"ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम्।" इति।

व्याकरणविमर्शः -

१. तातपरिजनस्य – तातस्य परिजनः तातपरिजनः, तस्य तातपरिजनस्य इति षष्ठीतत्पुरुषसमासः।

२. ऋष्यशृङ्गाश्रमात् - ऋष्यशृङ्गस्य आश्रम ऋष्यशृङ्गाश्रमः, तस्माद् ऋष्यशृङ्गाश्रमाद् इति षष्ठीतत्पुरुषसमासः।

पाठगतप्रश्नाः - २

८. कस्य रामभद्र इत्युपचारः शोभते।

९. ऋष्यशृङ्गाश्रमात् क आगतः।

१०. कः रामं रामभद्र इति सम्बोधयति।

१३.४) साम्प्रतं मूलपाठम् अवगच्छाम - १२

(प्रविश्य)

अष्टावक्रः - स्वस्ति वाम्।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भअव णमो दे। अवि कुसलं सजामातुअस्स गुरुअणस्स अज्जाए सन्ताए अ। (भगवन्नमस्ते। अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च?)

रामः - निर्विघ्नः सोमपीथी आवुत्तो मे भगवानृष्यश्रृङ्गः, आर्या च शान्ताः ?

सीता - अम्हे वि सुमरेदि (अस्मानपि स्मरति?)

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुर्भगवान् वसिष्ठस्त्वामिदमाह-

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च॥९॥

तत्किमन्यदाशास्महे। केवलं वीरप्रसवा भूयाः।

अन्वयः -

(प्रविश्य) **अष्टावक्रः** - वां स्वस्ति।

रामः - भगवन् ! अभिवादये इत आस्यताम्।

सीता - भगवन् ते नमः। अपि सजामातृकस्य गुरुजनस्य आर्यायाः शान्तायाः च कुशलम्?

रामः - मे आवुत्तः सोमपीथी भगवान् ऋष्यश्रृङ्गः निर्विघ्नः, आर्या च शान्ताः ?

सीता - अस्मान् अपि स्मरति?

अष्टावक्रः - (उपविश्य) अथ किम्। देवि ! कुलगुरुः भगवान् वसिष्ठः त्वाम् इदम् आह-

भगवती विश्वम्भरा भवतीम् असूत। प्रजापतिसमो राजा जनकः ते पिता। नन्दिनि तेषां पार्थिवानां त्वं वधूः असि, येषां कुलेषु सविता गुरुः वयं च (गुरवः)।

तत् अन्यत् किम् आशास्महे। केवलं वीरप्रसवाः भूयाः।

अन्वयार्थः -

(प्रविश्य प्रवेशं सम्पाद्य) **अष्टावक्रः** - वां युवाभ्यां स्वस्ति कुशलम् अविनाशः भवतात्।

रामः - भगवन् देव अभिवादये प्रणमामि। इतः अत्र आस्यताम् उपविश्यताम्।

सीता - भगवन् षडैश्वर्यशालिन् ते तुभ्यं नमः। अपि सजामातृकस्य जामात्रा सह गुरुजनस्य कौशल्याकैकेयीसुमित्राणाम् आर्यायाः शान्तायाः दशरथकन्यायाः अपि कुशलं सर्वं कुशलम् अस्ति खलु।

रामः - मे मम सोमपीथी सोमपानकर्ता आवुत्तः भगिनीपतिः भगवान् ऋष्यशृङ्गः आर्या शान्ता च निर्विघ्नः विघ्नरहितः (खलु)।

सीता - किं सा शान्ता अस्मान् अपि स्मरति चिन्तयति।

अष्टावक्रः - (उपविश्य उपवेशनं कृत्वा) (स्मरन्ति सर्वे भवन्तीम्। कुशलिनः सर्वे) अथ अधुना किम्। देवि हे राजमहिषि, कुलगुरुः भगवान् वसिष्ठः त्वां सीताम् इदम् एतत् आह अवोचत् -

भगवती षाड्गुण्यपरिपूर्णा विश्वम्भरा पृथिवी भवतीं सीताम् असूत प्रसूतवती। प्रजापतिसमो ब्रह्मसदृशः राजा नृपः जनकः विदेहापतिः ते तव पिता जनकः। नन्दिनि हे सौभाग्यवति, तेषां प्रसिद्धानां पार्थिवानां राज्ञां त्वं सीता वधूः कुलस्त्री असि भवसि, येषां राज्ञां कुलेषु वंशेषु सविता सूर्यः गुरुः पिता वंशप्रवर्तकः वयं च गुरवः हितोपदेष्टारः स्म।

तत् तस्मात् अन्यत् अपरं किम् आशास्महे इच्छामः। केवलं वीरप्रसवा वीरपुत्रका भूयाः भवतात्।

व्याख्यानम् -

ततः भगवान् अष्टावक्रः प्रविश्य ताभ्यां रामसीताभ्याम् आशीर्वादं दत्तवान् कल्याणम् अस्तु इति। रामः तस्य अभिवादनं कृत्वा आसनग्रहणाय तम् अनुरुद्धवान्। सीता च तस्य नमस्कारं कृत्वा जामातुः ऋष्यश्रृङ्गस्य तथा आर्यायाः शान्तायाः कुशलवार्ताम् अपृच्छत्। रामोऽपि भगिनीपतेः

ऋष्यशृङ्गस्य भगिन्याः च वार्तां पृष्टवान्। ततः सीतापि जिज्ञासितवती यत् तौ अपि किं रामं सीतां च स्मरतः इति। तानि वचनानि श्रुत्वा आसने च समुपविश्य महर्षिः अष्टावक्रः सीताम् उक्तवान् यत् तथैव भवति। ततः स कुलगुरुणा वसिष्ठेन सीतां प्रति यत् कथितं तत्सर्वं विज्ञापितवान् –

भगवती पृथिवी सीतां प्रसूतवती। किञ्च प्रजापतितुल्यः राजा जनकः सीतायाः पिता। अपि च सीता यस्य रघुवंशस्य कुलवधूः तस्य वंशस्य गुरुः भगवान् सूर्यः स्वयं वसिष्ठश्च। अस्मिन् श्लोके रघुवंशस्य प्रतापः औज्वल्यं च वसिष्ठमुखेन प्रकाशितं कविना। अत्र सीतां प्रति भगवतः वसिष्ठस्य वचने सीतायाः सर्वथा एव कल्याणं भविष्यति इति सारः वर्तते। एवम् एतेषां महाचरितानां संयोगात् सीतायाः कदापि अशुभं न भविष्यति, सदा मङ्गलमेव भविष्यति इत्याशयः।

अतः सीता वीरपुत्रस्य जननी भविष्यतीति महर्षेः वशिष्ठस्य आशीर्वादः।

विशेषटिप्पणी -

अत्र ऋषिश्रेयोविधानरूपस्य वसिष्ठानुग्रहस्य बीजस्य बहूकरणात् परिकरः। तल्लक्षणं दर्पणे - "बीजस्य बहूकरणं परिकरः।" इति।

अष्टावक्रं प्रति भगवन् इति रामस्य सम्बोधनम्। भगवतः लक्षणं तावत्-

"उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम्।

वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।।" इति।

व्याकरणविमर्शः -

१. सजामातृकस्य- जामात्रा सहितः सजामातृकः तस्य सजामातृकस्य इति बहुव्रीहिसमासः।

२. सोमपीथी – पीथं नाम पानम्। सोमस्य पीथं सोमपीथम् इति षष्ठीतत्पुरुषसमासः। तद् अस्य अस्ति इति अर्थे सोमपीथशब्दात् अत इनिठनौ इति इनिप्रत्यये सोमोपीथी इति रूपम्

३. विश्वम्भरा- विश्वोपपदपूर्वकात् भृधातोः खच्प्रत्यये मुमागमे टापि विश्वम्भरा इति रूपम्।

अलङ्कारविमर्शः -

१. प्रजापतिसमः इत्यत्र उपमालङ्कारः। तल्लक्षणं तावत्- "साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।" इति।

२. श्लोके येषां कुलेषु सविता गुरुर्वयं च इत्यत्र चेति शब्दोपादानात्समुच्चयः। तल्लक्षणं दर्पणे -

"समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके।

खले कपोतिकान्यायात्तत्करः स्यात्परोऽपि चेत्।

गुणौ क्रिये च युगपत् स्यातां यद्वा गुणक्रिये।।" इति।

३. जनकः पिता इत्यत्र पुनरुक्तवदाभासः। तल्लक्षणं दर्पणे -

"आपाततो यदर्थस्य पौनरुक्त्येन भासनम्।

पुनरुक्तवदाभासः स भिन्नाकारशब्दगः।।" इति।

छन्दः - विश्वम्भरा इत्यस्मिन् श्लोके वसन्ततिलकं छन्दः वर्तते। तल्लक्षणं तावद् - “उक्ता वसन्ततिलकं तभजा जगौ गः” इति।

पाठगतप्रश्नाः - ३

११. सीतायाः माता का।

१२. सीतायाः पिता कः।

१३. सीता कस्य वंशस्य वधूः।

१४. सीतां प्रति वशिष्ठस्य क आशीर्वादः।

१३.५) साम्प्रतं मूलपाठम् अवगच्छाम - १३

रामः - **अनुगृहीताः स्मः।**

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥१०॥

अष्टावक्रः - **इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टम् - ‘यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात्सम्पादयितव्य’ इति।**

रामः- **क्रियते यद्येषा कथयति।**

अष्टावक्रः - **ननान्दुः पत्या च देव्याः संदिष्टमृष्यशृङ्गेण - ‘वत्से, कठोरगर्भेति नानीतासि। वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः। तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः इति।**

रामः - **(सहर्षलज्जास्मितम्) तथास्तु। भगवता वसिष्ठेन न किञ्चिदादिष्टोस्मि।**

अन्वयः -

रामः - अनुगृहीताः स्मः।

लौकिकानां साधूनां वाक् हि अर्थम् अनुवर्तते। पुनः आद्यानाम् ऋषीणां वाचम् अर्थः अनुधावति ॥१०॥

अष्टावक्रः - इदं च भगवत्या अरुन्धत्या देवीभिः शान्तया च भूयो भूयः सन्दिष्टम् - ‘यः कश्चिद् अस्याः गर्भदोहदः भवति सः अवश्यम् अचिरात् सम्पादयितव्यः’ इति।

रामः- एषा यत् कथयति क्रियते।

अष्टावक्रः - ननान्दुः पत्या ऋष्यशृङ्गेण च देव्याः सन्दिष्टम्- ‘वत्से, कठोरगर्भा इति न आनीता असि। वत्सः अपि रामभद्रः त्वद्विनोदार्थम् एव स्थापितः। तत् पुत्रपूर्णोत्सङ्गाम् आयुष्मतीं द्रक्ष्यामः इति।

रामः - (सहर्षलज्जास्मितम्) तथा अस्तु। भगवता वसिष्ठेन न किञ्चिद् आदिष्टः अस्मि।

अन्वयार्थः -

रामः - अनुगृहीताः कृतार्थाः स्मः भवामः।

हि यतः लोकिकानां सामान्यानां साधूनां सतां वाक् वाणी अर्थं वस्तु अनुवर्तते अनुसरति। पुनः परन्तु आद्यानां वैदिकानां प्रधानानाम् ऋषीणाम् वशिष्ठादीनां वाचं वाणीम् अर्थं वस्तु अनुधावति अनुसरति।॥१०॥

अष्टावक्रः - इदं च भगवत्या देव्या अरुन्धत्या देवीभिः कौशल्याकैकेयीसुमित्राभिः शान्तया श्रीरामभगिन्या च भूयो भूयः वारं वारं सन्दिष्टम् आदिष्टम् - 'यः कश्चित् कोऽपि अस्याः सीताया गर्भदोहदः अभिलाषा भवति सः अवश्यं निश्चयेन अचिरात् अतिशीघ्रं सम्पादयितव्यः पूरणीयः' इति।

रामः- एषा सीता यत् यथा कथयति वदति तथा क्रियते सम्पाद्यते।

अष्टावक्रः - ननान्दुः पतिस्वसुः पत्या स्वामिना ऋष्यशृङ्गेण च देव्याः देवीं प्रति सन्दिष्टम् उक्तम् - 'वत्से कल्याणि, कठोरगर्भा पूर्णगर्भा इति न आनीता आहूता असि। वत्सः पुत्रः अपि रामभद्रः रामचन्द्रः त्वद्विनोदार्थं तव विनोदाय एव स्थापितः तत्र स्थितये आदिष्टः। तत् तस्मात् पुत्रपूर्णोत्सङ्गाम् सन्तानभूषितक्रोडाम् आयुष्मतीं चिरञ्जीविनीं द्रक्ष्यामः अवलोकयिष्यामः इति।

रामः - (सहर्षलज्जास्मितम् हर्षेण लज्जया स्मितहासेन च सहितम्) तथा एवम् अस्तु भवतु। भगवता कुलगुरुणा वसिष्ठेन न किञ्चिद् न किमपि कर्तुम् आदिष्टः अस्मि।

व्याख्यानम् -

सीता वीरपुत्रस्य जननी भविष्यतीति महर्षेः वशिष्ठस्य आशीर्वादं श्रुत्वा रामः आत्मानम् अनुगृहीतं मन्यते। स तदा महर्षीणाम् उत्कृष्टत्वं वर्णयति। लौकिकाः सामान्याः जनाः साधवः वा यत् भवति तदेव सर्वं वर्णयति। अर्थात् प्रत्यक्षीकृतस्य विषयस्य वर्णना एव तैः क्रियते। न कस्यापि अप्रत्यक्षस्य। किन्तु प्राचीनाः महर्षयः विपरीतम् एव आचरन्ति। ते यत् कथयति तत् सर्वमेव भाविनि काले भविष्यति। अनेन तेषां दूरदर्शिता ज्ञायते। अतः महर्षिः वसिष्ठः यत् सीतायां वीरपुत्रस्य जन्म भविता इति अवदत् तत् सत्यमेव भाविकाले सम्भविष्यति इति श्रीरामस्याशयः।

ततः अष्टावक्रः वसिष्ठपत्न्या अरुन्धत्या रामस्वस्रा शान्तया मातृभिः कौशल्याकैकेयीसुमित्राभिः च रामं प्रति प्रेषितं सन्देशं वर्णयति। सम्प्रति सीता गर्भवती अस्ति। अतः अस्याम् अवस्थायां तस्याः सर्वविधाः अभिलाषाः रामेण त्वरा पालनीयाः। रामः सहासं तेषाम् आदेशम् अङ्गीकरोति।

महर्षिः ऋष्यशृङ्गः अष्टावक्रमुखेन यज्ञस्थानं प्रति सीता कथं न आनीता इति ज्ञापयति। स वदति यत् सीता इदानीं पूर्णगर्भा अस्ति। अतः आगमने क्लेशः सम्भविष्यति इति विचिन्त्य सा न आनीता। वत्सः रामचन्द्रः अपि सीतायाः मनोरञ्जनाय एव अयोध्यायां तिष्ठति। ततश्च स ससुताम् आयुष्मतीं सीतां द्रष्टुं आगमिष्यति परमिति ऋष्यशृङ्गमुनेः आश्वासनम्। रामः तत्सर्वं श्रुत्वा वसिष्ठेन तं प्रति कश्च उपदेशः प्रदत्तः न वा इति पृच्छति।

विशेषटिप्पणी -

अत्र लौकिकानामिति श्लोके ऋषिश्रेयोविस्तरणरूपस्य बीजगुणस्य वर्णनाद् विलोभनं नाम सन्ध्यङ्गं भवति। तल्लक्षणं तावद् - "बीजगुणवर्णनं विलोभनम्" इति।

व्याकरणविमर्शः -

१. लौकिकानाम् - लोके भवा लौकिकाः। अत्र लोकात् ठञ्प्रत्ययः। लौकिकशब्दस्य षष्ठीबहुवचने लौकिकानामिति रूपम्।

२. आद्यानाम् - आदौ भवाः आद्याः। आदिशब्दाद् यत्प्रत्यये आद्यशब्दो निष्पन्नः। तस्य षष्ठीबहुवचने आद्यानाम् इति रूपम्।

३. ऋषीणाम् - ऋष गताविति धातुः। ऋषधातोः "सर्वधातुभ्य इन्" इति सूत्रेण इन्प्रत्यये, "इगुपधात् कित्" इति सूत्रेण किति च ऋषिशब्दो निष्पन्नः। तस्यैव षष्ठीबहुवचने ऋषीणामिति रूपम्।

४. सन्दिष्टम् - सम्-पूर्वकात् दिश्धातोः क्तप्रत्यये नपुंसके सन्दिष्टम् इति रूपम्।

५. सम्पादयितव्यम् - सम्पूर्वकात् पद्धातोः णिचि तव्यति नपुंसके सम्पादयितव्यम् इति रूपम्।

६. कठोरगर्भा - कठोरः गर्भः यस्याः सा कठोरगर्भा इति बहुव्रीहिसमासः।

७. पुत्रपूर्णोत्सङ्गाम् - पुत्राभ्यां पूर्णः पुत्रपूर्णः इति तृतीयातत्पुरुषसमासः। पुत्रपूर्णः उत्सङ्गः यस्याः सा पुत्रपूर्णोत्सङ्गा इति बहुव्रीहिसमासः, ताम्।

छन्दः-

१. लौकिकानाम् इति श्लोके अनुष्टुप् छन्दः।

अलङ्कारविमर्शः -

१. लौकिकानाम् इति श्लोके लौकिकानां साधूनाम् अपेक्षया आद्यानाम् ऋषीणां वचसाम् आधिक्यवचनाद् व्यतिरेकालङ्कारः। तल्लक्षणं दर्पणे -

"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा। व्यतिरेकः" इति।

पाठगतप्रश्नाः - ४

१५. केषां वाचम् अर्थः अनुधावति।

१६. केषाम् अर्थं वाग् अनुवर्तते।

१७. अरुन्धत्याः रामस्य जननीनां शान्तायाश्च रामं प्रति क आदेशः।

१८. सीता कुतः यज्ञं प्रति नानीता।

१९. रामः कथम् अयोध्यायां स्थापितः।

२०. ऋष्यशृङ्गः सीतां कीदृशीं द्रष्टुमिच्छति

१३.६) साम्प्रतं मूलपाठम् अवगच्छाम - १४

अष्टावक्रः - श्रूयताम्।

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवं च राज्यम्।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद्यशो यत्परमं धनं वः॥११॥

रामः - यथा समादिशति भगवान्मैत्रावरुणिः।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता- अदो जेव्व राहवधुरन्धरो अज्जउत्तो। (अत एव राघवधुरन्धर आर्यपुत्रः।)

रामः - कः कोऽत्र भोः। विश्राम्यतामष्टावक्रः।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

अन्वयः -

अष्टावक्रः - श्रूयताम्।

वयं जामातृयज्ञेन निरुद्धाः त्वं बाल एव असि च राज्यं नवम् (अत एव) प्रजानाम् अनुरञ्जते युक्तः स्याः तस्मात् यशः वः परमं धनम् (अस्ति)।।११।।

रामः - भगवान् मैत्रावरुणिः यथा समादिशति।

लोकस्य आराधनाय स्नेहं दयां सौख्यं च यदि वा जानकीम् अपि मुञ्चतो मे व्यथा न अस्ति॥ १२॥

सीता - अत एव आर्यपुत्रः राघवधुरन्धरः।

रामः - कः कः अत्र भोः। अष्टावक्रः विश्राम्यताम्।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः।

(इति निष्क्रान्तः)

अन्वयार्थः -

अष्टावक्रः - श्रूयताम् आकर्ण्यताम्।

वयं वसिष्ठादयः जामातृयज्ञेन ऋष्यशृङ्गस्य द्वादशवर्षव्यापिना यज्ञेन निरुद्धाः उपरुद्धाः स्मः। त्वं रामः बालः कुमारः राज्यशासने अप्रौढः च असि। राज्यं नवम् नूतनम् अस्ति। अतः प्रजानां लोकानाम्

अनुरञ्जने अनुरागोत्पादने युक्तः तत्परः स्याः भवेः। तस्मात् अनुरागोत्पादनात् यशः कीर्तिर्भविष्यति, यद् यशः वः युष्माकं परमं सर्वोत्कृष्टं धनम् सम्पत्।।११।।

रामः - भगवान् षडैश्वर्यसम्पन्नः मैत्रावरुणिः वसिष्ठमहर्षिः यथा समादिशति यथा आज्ञापयति तथैव करिष्यामीति भावः।

लोकस्य जनस्य आराधनाय प्रसादनाय स्नेहम् अनुरागं, दयां करुणां, सौख्यं सुखं च यदि वा जानकीम् अपि सीताम् अपि मुञ्चतः त्यजतः मे मम व्यथा दुःखं न अस्ति न भवति॥१२॥

सीता- अत एव अस्मात् कारणाद् आर्यपुत्रः मम स्वामी राघवधुरन्धरः रघुकूलशिरोमणिः।

रामः - कः कः अत्र भोः अत्र कः अस्ति। अष्टावक्रः विश्राम्यतां अष्टावक्रस्य विश्रामप्रबन्धः सम्पाद्यताम्।

अष्टावक्रः- (उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः आगतः।

(इति निष्क्रान्तः एवमुक्त्वा निर्गतः)

व्याख्यानम् -

अत्र वसिष्ठः रामाय राज्यशासनविषयकम् उपदेशं ददाति। ऋष्यशृङ्गस्य यज्ञम् उपलक्ष्य राज्यस्य सर्वे एव प्रौढाः जनाः स्वयं कुलगुरुः वसिष्ठः च तत्र सन्ति। अतः तेषाम् आगमने विलम्बः भविष्यति। रामस्य च सम्प्रति एव राज्याभिषेकः अभवत्। अतः राज्यशासनविषये सः अधुनापि अनभिज्ञः अस्ति। रघुवंशीयानां नृपाणां यशः एव परमम् अभीष्टं वर्तते। अतः कीर्तिलाभाय सततं प्रजामनसाम् अनुरञ्जने तत्परः भवितव्यः। यथा प्रजाः नृपे सन्तुष्टाः भवेयुः इत्यस्मिन् विषये ध्यानं देयम्। तेनैव रामः यथार्थः प्रजापालकः राजा भवितुं शक्नुयात् इति वसिष्ठस्य अभिप्रायः। भाविनि काले प्रजानाम् अनुरागम् उत्पादयितुं रामेण सीतापरित्यागः करिष्यते इति घटनानिर्देशः अत्र प्राप्यते।

रामः वसिष्ठेन यथा आदिष्टं तथा एव कर्तुं प्रतिज्ञां कृतवान्। प्रजापालनाय स सर्वम् अपि कर्तुं समर्थः। तस्य कृते स स्नेहं दयां सौख्यं सर्वम् अपि परित्यक्तुं प्रस्तुतः। अपि च जनानाम् आराधनाय यदि धर्मपत्नी जानकी अपि त्यक्तव्या भवति तर्हि अपि तस्य किञ्चिदपि दुःखं न भविष्यति। अनेन श्रीरामस्य प्रजावात्सल्यं गुरुवचने श्रद्धा च प्रकाशिता भवति। अपि च भाविनि काले प्रजानां कृते सीता अपि परित्यक्ष्यते इति द्योत्यते।

प्रजापालनविषयिणीं रामस्य प्रतिज्ञाम् आकर्ण्य सीता स्वभर्तारं रामं प्रशंसन्ती अवदत् यद् अस्मात् कारणाद् एव श्रीरामः रघुकुलस्य श्रेष्ठः। रामः ततः भगवतः अष्टावक्रस्य विश्रामव्यवस्थाकरणाय आदिष्टवान्। तदनन्तरं भगवान् अष्टावक्रः विश्रामात् उत्थाय तत्र परिक्राम्यति। तदा तत्र लक्ष्मणः उपस्थितः। तं दृष्ट्वा अष्टावक्रः 'कुमारलक्ष्मणः प्राप्तः' इत्युक्त्वा निष्क्रान्तः।

विशेषटिप्पणी -

अत्र जामातैयज्ञेनेति श्लोके प्रजानुरञ्जनाद् प्राप्तं यशः परमं धनमित्यादिना सीतानिर्वासनरूपं बीजमुक्तम्। तल्लक्षणं तावद् दर्पणे –

"अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति।

फलस्य प्रथमो हेतुर्बीजं तदभिधीयते।।" इति।

व्याकरणविमर्शः -

१. जामातृयज्ञेन – जामातुः यज्ञः जामातृयज्ञः इति षष्ठीतत्पुरुषसमासः, तेन जामातृयज्ञेन।

२. अनुरञ्जने - अनुपूर्वकात् रञ्ज्धातोः ल्युटि सप्तम्येकवचने अनुरञ्जने इति रूपम्।

३. सौख्यम् – सुखस्य भावः इत्यर्थे ष्यञ्प्रत्यये सौख्यम् इति रूपम्।

४. मुञ्चतः - मुच्-धातोः शतरि षष्ठ्येकवचने मुञ्चतः इति रूपम्।

५. मैत्रावरुणिः - मित्रश्च वरुणश्च मित्रावरुणौ इति इतरेतरद्वन्द्वसमासः। मित्रावरुणयोः अपत्यं पुमान् इति विग्रहे "बाह्वादिभ्यश्च" इति इञ्प्रत्यये मैत्रावरुणिः इति रूपम्।

छन्दः -

१. जामातृयज्ञेन इत्यस्मिन् श्लोके इन्द्रवज्राछन्दः वर्तते। तल्लक्षणम् उक्तं - स्यादिन्द्रवज्रा यदि तौ जगौ गः। इति।

२. स्नेहमिति श्लोके अनुष्टुप् छन्दः।

पाठगतप्रश्नाः - ५

२१. वसिष्ठादयः केन निरुद्धाः।

२२. रघुवंशीयानां परमं धनं किम्।

२३. जामातृयज्ञेनेति श्लोके किं छन्दः वर्तते। तस्य लक्षणं किम्।

२४. मैत्रावरुणिः इति रूपं साधयत।

२५. लोकस्य आराधनाय रामः किं किं त्यक्तुं प्रस्तुतः।

२६. राज्ञः प्रधानः धर्मः कः।

१३.७) साम्प्रतं मूलपाठम् अवगच्छाम - १५

(प्रविश्य)

लक्ष्मणः- जयति जयत्यार्यः। आर्य! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखितम्। तत्पश्यत्वार्यः।

रामः- जानासि वत्स! दुर्मनायमानां देवीं विनोदयितुम्। तत्कियन्तमवधिं यावत्।

लक्ष्मणः- यावदार्याया हुताशनशुद्धिः।

रामः- शान्तं पापम् (ससान्त्ववचनम्।)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥१३॥
देवि देवयजनसम्भवे ! प्रसीद। एष ते जीविताविधिः प्रवादः।

क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि॥१४॥

अन्वयः -

(प्रविश्य) **लक्ष्मणः** - आर्यः जयति जयति। आर्य! अर्जुनेन चित्रकरेण अस्मदुपदिष्टम् आर्यस्य चरितम् अस्यां वीथ्याम् अभिलिखितम्। तत् आर्यः पश्यतु।

रामः- वत्स! दुर्मनायमानां देवीं विनोदयितुं जानासि । तत् कियन्तम् अवधिं यावत्।

लक्ष्मणः- आर्याया हुताशनशुद्धिः यावत्।

रामः-शान्तं पापम् (ससान्त्ववचनम्।)

उत्पत्तिपरिपूतायाः अस्याः पावनान्तरैः किम्। तीर्थोदकं च वह्निश्च अन्यतः न शुद्धिम् अर्हतः ॥ १३॥

देवयजनसम्भवे देवि, प्रसीद। एष प्रवादः ते जीविताविधिः।

क्लिष्टः जनः जनैः अनुरञ्जनीयः किल, तत् ते नः यद् अशुभम् उक्तं तत् न क्षमम्। सुरभिणः कुसुमस्य मूर्ध्नि स्थितिः नैसर्गिकी सिद्धा, चरणैः अवताडनानि न॥१४॥

अन्वयार्थः -

(प्रविश्य प्रवेशं सम्पाद्य) **लक्ष्मणः** - आर्यः जयति जयति महाराज, भवतः सदा विजयः। आर्य महाराज! अर्जुनेन चित्रकरेण अर्जुननामकेन चित्रकारिणा अस्मदुपदिष्टम् अस्माभिः उपवर्णितम् आर्यस्य श्रीरामस्य चरितं जीवनम् अस्यां वीथ्याम् अस्यां चित्रमयश्रेण्याम् अभिलिखितम् अङ्कितम्। तत् चित्रम् आर्यः रामचन्द्रः पश्यतु अवलोकयतु।

रामः - वत्स प्रिय! दुर्मनायमानां दुःखितमानसां देवीं सीतां विनोदयितुं सन्तोषयितुं जानासि शक्नोषि। तत् चित्रम् कियन्तम् अवधिं यावत् कियत्पर्यन्तम्।

लक्ष्मणः - आर्यायाः सीतायाः हुताशनशुद्धिः यावत् अग्निपरीक्षणपर्यन्तम्।

रामः - शान्तं पापम् त्वया एवं पुनः नैव वक्तव्यम् (ससान्त्ववचनम् अत्यन्तमधुरवचःसहितम्)

उत्पत्तिपरिपूतायाः उत्पत्त्या जन्मना एव परिपूतायाः अयोनिजत्वात् पवित्रायाः शुद्धाया अस्याः सीतादेव्याः पावनान्तरैः अग्न्यादिपवित्रताजनकैः किं किं प्रयोजनम्। तीर्थोदकं गङ्गादितीर्थजलं च वह्निश्च अग्निश्च अन्यतः अन्यस्मात् शुद्धिं पवित्रतां न अर्हतः सम्पादयितुं न योग्यौ भवतः।॥१३॥

देवयजनसम्भवे देवयज्ञसमुत्पन्ने देवि भगवति, प्रसीद प्रसन्ना भव। एषः अयं ते तव जीवितावधिः आजीवनं प्रवादः लोकापवादः।

क्लिष्टः दुःखितः जनः लोकः जनैः अन्यलोकैः अनुरञ्जनीयः आराधनीयः किल निश्चयेन। तत् तस्मात् ते तव नः आवयोः विषये यत् अशुभम् अशिवम् तत् कथनं न क्षमम् न युक्तम् नोचितम्। सुरभिणः सुगन्धितस्य कुसुमस्य पुष्पस्य मूर्ध्नि मस्तके स्थितिः अवस्थानम् नैसर्गिकी स्वाभाविकी सिद्धा लोके प्रसिद्धा, परन्तु चरणैः पादैः अवताडनानि चरणमर्दनानि प्रहाराः वा न नैसर्गिकाणि न स्वाभाविकानि॥ १४॥

व्याख्यानम् -

लक्ष्मण आगत्य रामस्य विजयप्रशस्तिमुक्त्वा तस्मै निवेदयति यत् यथादिष्टं रामजीवनवृत्तान्तस्य चित्राङ्कनम् अर्जुननामकेन चित्रकारेण सम्पन्नम्। अत चित्रमिदं भवान् किञ्चित् पश्यतु इति रामं प्रार्थयति लक्ष्मणः। ततः रामः लक्ष्मणम् वदति यत् सीता पितृविरहे विषण्णचित्ता वर्तते, तस्मात् दुःखितायाः तस्या विनोदाय त्वं समर्थः। ततः स लक्ष्मणम् पृच्छति यत् चित्रमिदं किं पर्यन्तम् चित्रितम् इति। तदा लक्ष्मणः उत्तरं प्रदत्तवान् यत् - देव्या सीतायाः अग्निपरीक्षापर्यन्तं चित्रस्य अस्य व्याप्तिः। लक्ष्मणवचनं श्रुत्वा अप्रसन्नः रामः सुमधुरम् वदति तादृशं वाक्यं न वाच्यम्।

आजन्मशुद्धायाः सीतायाः शुद्धतायाः परीक्षायै अन्येन केनचित् द्रव्येण प्रयोजनं नास्ति। यथा तीर्थस्य जलं वह्निः च इत्यनयोः अन्यैः द्रव्यैः शुद्धीकरणस्य प्रयोजनं न भवति तयोः शुद्धत्वात् तथैव चिरशुद्धायाः सीतायाः अग्निना शुद्धिः नापेक्षते। स्वतः शुद्धत्वात् अन्यतः शुद्धिसम्पादनं नावश्यकमिति भावः।

ततः सीता प्रति रामः कथयति यत् सा यथा प्रसन्ना भवेत्। अयं लोकापवादः तस्या आजीवनमेव। ततो रामो वदति यत् ये जनास्तावत् स्वकुलस्य रक्षां कुर्वन्ति, तैः दुःखितजनाः न तिरस्कर्तव्याः अपि तु अवश्यम् अनुरञ्जनीयाः। अतः दुःखितायाः तव विषये यानि अशुभवाक्यानि प्रयुक्तानि तानि न युक्तानि इति भावयामि। प्रसङ्गस्य स्पष्टीकरणाय दृष्टान्तः प्रदीयते। सुरभिविशिष्टानां कुसुमानां पादैः मर्दनं न योग्यम्। यतो हि तेषां मस्तके अवस्थानं स्वाभाविकं भवति इति तात्पर्यम्।

व्याकरणविमर्शः -

१. दुर्मनायमानाम्- दुःस्थितं मनः यस्याः सा दुर्मनाः इति बहुव्रीहिसमासः। अदुर्मनाः दुर्मनाः भवति इत्यर्थे क्यङ्प्रत्यये निष्पन्नाद् दुर्मनायधातोः शानच्प्रत्यये टापि दुर्मनायमाना इति भवति। ततः द्वितीयैकवचने दुर्मनायमानाम् इति रूपम्।

२. उत्पत्तिपरिपूतायाः - उत्पत्त्या परिपूता उत्पत्तिपरिपूता इति तृतीयातत्पुरुषसमासः, तस्याः उत्पत्तिपरिपूतायाः।

३. पावनान्तरैः – पावयन्ति इति पावनानि। अन्यानि पावनानि पावनान्तराणि तैः इति पावनान्तरैः इति मयूरव्यंसकादिवत्समासः।

४. तीर्थोदकम् - तीर्थस्य उदकं तीर्थोदकम् इति षष्ठीतत्पुरुषसमासः।

५. अनुरञ्जनीयः– अनुपूर्वकात् रञ्ज्धातोः णिच्प्रत्यये अनीयर्प्रत्यये च अनुरञ्जनीय इति रूपम्।

६. नैसर्गिकी - निसर्गाद् आगता इत्यर्थे निसर्गशब्दात् ठकि ङीपि नैसर्गिकीशब्दो निष्पद्यते।

७. स्थितिः - स्थाधातोः क्तिन्प्रत्यये स्थितिशब्दो निष्पद्यते।

छन्दः -

१. उत्पत्तिपरिपूताया इत्यस्मिन् श्लोके अनुष्टुप् छन्दः।

२. क्लिष्टो जनः इति श्लोके वसन्ततिलकं छन्दः।

अलङ्कारविमर्शः-

१. उत्पत्तिपरिपूतायाः इत्यस्मिन् श्लोके तीर्थोदकवह्निदृष्टान्तेन सीतायाः पवित्रतासमर्थनाद् दृष्टान्तालङ्कारः। तल्लक्षणम् उक्तं दर्पणे- “दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।” इति।

२. क्लिष्टो जनः इत्यस्मिन् श्लोके अपि दृष्टान्तालङ्कारः।

पाठगतप्रश्नाः - ६

२७. चित्रकारस्य किम् अभिधानम्।

२८. रामचरितं कियद् वीथिकायाम् अभिलिखितम्।

२९. किं किं स्वतः एव पवित्रं भवति।

३०. सीतायाः कैः प्रयोजनं नास्ति।

३१. क्लिष्टं जनं प्रति किं कर्तव्यम्।

३२. कुसुमस्य का नैसर्गिकी।

पाठसारः

भूमिसुता सीता वैदही रामपत्नी सीता आसीना। रामः सीतां सान्त्वयितुमनाः प्रविशति। तस्मिन्नेव समये ऋष्यशृङ्गमुनेः आश्रमाद् वसिष्ठादीनां संवादं स्वीकृत्य भगवान् अष्टावक्रः आगतः। स वसिष्ठादीनां सन्देशं श्रावयन् कथयति यत् महर्षिः वसिष्ठः सीतायै आशीर्वादं प्रदत्तवान् - सा वीरप्रसवा भूयाः इति। वसिष्ठपत्नी अरुन्धती राममातरः कौशल्याकैकेयीसुमित्राः शान्ता च रामं प्रति उक्तवत्यः यत् - सीता गर्भवती अस्ति, अतः इदानीं रामेण तस्याः सर्वा अभिलाषाः शीघ्रं पूरणीयाः। महर्षिः ऋष्यशृङ्गः अवदत् यत् कठोरगर्भत्वात् सीता यज्ञस्थानं प्रति आगन्तुं न समर्था। अतः स परं सपुत्रां तां द्रष्टुम् अयोध्याम् आगमिष्यति इति। कुलगुरुः वसिष्ठः रामम् आदिष्टवान् यत् प्रजाः यथा सुखिनः स्युः तथा राज्यपालनं कर्तव्यम्। यतो हि तेन एव रघुवंशीयानाम् अभीष्टं यशः प्राप्तुं शक्नुयात्। आदेशं श्रुत्वा रामः कथयति यत् प्रजानां सुखाय स स्नेहस्य दयायाः सौख्यस्य धर्मपत्न्याः सीताया अपि परित्यागं कर्तुं सन्नद्धः अस्ति। अनेन एव श्रीरामवचनेन स भाविकाले सीतां परित्यक्ष्यति इति सूचितो भवति। ततः कुमारः लक्ष्मणः प्रविशति। महर्षिः अष्टावक्रः विश्रामस्वीकाराय गच्छति। लक्ष्मणः कथयति यत् यथादिष्टं तथा एव रामचरितात्मकं चित्रपटम् अङ्कयित्वा चित्रकारः आगतः इति। ततः रामः लक्ष्मणं पृच्छति यत् एतस्य चित्रस्य व्याप्तिः कियत्पर्यन्तम्। तदा लक्ष्मणः वदति यत् सीतायाः अग्निशुद्धिपर्यन्तं तत्र चित्रितम् अस्ति इति। ततश्च रामः सीतायाः आजन्मशुद्धतां वर्णयति। यथा तीर्थजलं वह्निः च स्वतः पवित्रं तथा सीता अपि स्वतः पवित्रा। अतः रामः सीतायाः खेदो मा भवेदिति कथयति। यः क्लिष्टः जनो भवति तस्य क्लेशनिवारणमेव उचितम्, अतः सीतां प्रति लक्ष्मणस्य वचनं न योग्यम्। यतो हि कुसुमस्य स्वाभाविकम् अवस्थानं शिरसि एव भवति, न तु पादैः लेहनं तस्य उचितम्। एवं प्रकारेण अयं पाठः समाप्यते।

पाठान्तप्रश्नाः

१. किन्त्वनुष्ठाननित्यत्वमिति श्लोकं व्याख्यात।
२. गुरुजनैः रामं प्रति उक्तान् उपदेशान् लिखत।
३. विश्वम्भरा इत्यादिश्लोकं व्याख्यात।
४. लौकिकानां साधूनाम् आद्यानां च ऋषीणां कः भेदः - तत् लौकिकानाम् इत्यादिश्लोकव्याख्यानपुरःसरं वर्णयत।
५. सीतायाः आजन्मपवित्रताविषये श्रीरामेण किम् उक्तम्।
६. जामातृयज्ञेनेति श्लोकं व्याख्यात।
७. स्नेहं दयां च सौख्यम् इति श्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. अनुष्ठाननित्यत्वं गृहस्थानां स्वातन्त्र्यम् अपकर्षति।

२. किन्तु अनुष्ठाननित्यत्वम् इति सन्धिविच्छेदः।

३. कर्म त्रिविधं भवति - नित्यं नैमित्तिकं काम्यं च।

४. आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा भवति।

५. बन्धुजनविप्रयोगाः सन्तापकारिणः भवन्ति।

६. संसारभावाः हृदयमर्मच्छिदो भवन्ति।

७. हृदमर्मच्छिद्भ्यः संसारभावेभ्यः विरक्ता मनीषिणः सर्वान् कामान् सन्त्यज्य अरण्ये विश्राम्यन्ति।

८. तातपरिजनस्य रामभद्र इत्युपचारः शोभते।

९. ऋष्यशृङ्गाश्रमाद् अष्टावक्रमुनिः आगतः।

१०. कञ्चुकी रामं रामभद्र इति सम्बोधयति।

११. सीतायाः माता का विश्वम्भरा पृथिवी।

१२. सीतायाः प्रजापतिसमः जनकः पिता।

१३. येषां वंशे सविता वंशप्रवर्तकः वसिष्ठादयश्च आचार्याः तेषां वंशस्य सीता वधूः।

१४. सीतां प्रति वशिष्ठस्य "वीरप्रसवाः भूयाः" इति आशीर्वादः।

१५. आद्यानाम् ऋषीणां वाचम् अर्थः अनुधावति।

१६. लौकिकानां साधूनाम् अर्थं वाग् अनुवर्तते।

१७. अरुन्धत्याः रामस्य जननीनां शान्तायाश्च रामं प्रति आदेशः अयं यद् इदानीं सीता पूर्णगर्भा, अतस्तस्य सर्वा अभिलाषाः रामेण शीघ्रमेव पूरणीयाः इति।

१८. सीता कठोरगर्भा इत्यतः यज्ञं प्रति नानीता।

१९. रामः सीताया विनोदाय अयोध्यायां स्थापितः।

२०. ऋष्यशृङ्गः सीतां पुत्रपूर्णक्रोडां द्रष्टुमिच्छति।

२१. वसिष्ठादयः जामातुः ऋष्यशृङ्गस्य यज्ञेन निरुद्धाः।

२२. रघुवंशीयानां प्रजानुरञ्जनात् प्राप्तं यशः परमं धनम्।

२३. जामातृयज्ञेनेति श्लोके इन्द्रवज्राछन्दः वर्तते। तस्य लक्षणं तावत् - "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति।

२४. मित्रश्च वरुणश्च मित्रावरुणौ इति इतरेतरद्वन्द्वसमासः। तयोः अपत्यं पुमान् इति विग्रहे "बाह्वादिभ्यश्च" इत्यनेन इञ्प्रत्यये मैत्रावरुणिः इति रूपम्।

२५. लोकस्य आराधनाय रामः स्नेहं दयां सौख्यं जानकीमपि त्यक्तुं प्रस्तुतः।

२६. राज्ञः प्रधानः धर्मः प्रजानाम् आराधनम्।

२७. चित्रकारस्य अर्जुनः इत्यभिधानम्।

२८. रामचरितं सीतायाः हुताशनशुद्धिं यावद् वीथिकायाम् अभिलिखितम्।

२९. तीर्थोदकम् अग्निश्च स्वतः एव पवित्रं भवति।

३०. सीतायाः पावनान्तरैः प्रयोजनं नास्ति।

३१. क्लिष्टः जनः तत्सम्बन्धिभिः क्लेशं विस्मार्य अनुरञ्जनीयः।

३२. कुसुमस्य शिरसि स्थितिः नैसर्गिकी।

॥ इति त्रयोदशः पाठः ॥